श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.10- द्वितीय सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥**
**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथ दशमोऽध्यायः॥**

### श्रीभगवानुवाच

**मयोदितेष्ववहितः(स्), स्वधर्मेषु मदाश्रयः ।**
**वर्णाश्रमकुलाचार- मकामात्मा समाचरेत् ॥ 1॥**

मयो+ दितेष्व + वहितः(स्), वर्णा+ श्रम+ कुलाचार

**अन्वीक्षेत विशुद्धात्मा , देहिनां(वँ) विषयात्मनाम् ।**
**गुणेषु तत्त्वध्यानेन, सर्वारम्भविपर्ययम् ॥ 2॥**

विषयात्+ मनाम्, सर्वारम्भ+ विपर्य+ यम्

सुप्तस्य विषयालोको , ध्यायतो वा मनोरथः ।
नानात्मकत्वाद् विफलस्- तथा भेदात्मधीर्गुणैः ॥ 3॥

नानात्+ मकत्वाद्, भेदात्+ मधीर्+ गुणैः

निवृत्तं(ङ्) कर्म सेवेत , प्रवृत्तं(म्) मत्परस्त्यजेत् ।
जिज्ञासायां(म्) सं(म्)प्रवृत्तो, नाद्रियेत् कर्मचोदनाम् ॥ 4॥

मत्+ परस्+ त्यजेत्

यमानभीक्ष्णं(म्) सेवेत , नियमान् मत्परः(ख्) क्वचित् ।
मदभिज्ञं(ङ्) गुरुं(म्) शान्त- मुपासीत मदात्मकम् ॥ 5॥

यमा+ नभीक्ष्णं(म्)

अमान्यमत्सरो दक्षो , निर्ममो दृढसौहृदः ।
असत्वरोऽर्थजिज्ञासु- रनसूयुरमोघवाक् ॥ 6॥

अमान्य+ मत्सरो, असत्वरोऽर्थ+ जिज्ञासु , रनसूयु+ रमोघवाक्

जायापत्यगृहक्षेत्र- स्वजनद्रविणादिषु ।
उदासीनः(स्) समं(म्) पश्यन्, सर्वेष्वर्थमिवात्मनः ॥ 7॥

जाया+ पत्य+ गृहक्षेत्र ,स्वज+ नद्रविणा+ दिषु , सर्वेष्+ वर्थ+ मिवात्मनः

विलक्षणः(स्) स्थूलसूक्ष्माद्, देहादात्मेक्षिता स्वदृक् ।
यथाग्निर्दारुणो दाह्याद्, दाहकोऽन्यः(फ्) प्रकाशकः ॥ 8॥

स्थू+ लसूक्ष्माद्, देहा+ दात्मेक्षिता ,यथाग्निर्+ दारुणो

निरोधोत्पत्त्यणुबृहन्- नानात्वं(न्) तत्कृतान् गुणान् ।
अन्तः(फ्) प्रविष्ट आधत्त, एवं(न्) देहगुणान् परः ॥ 9॥

निरोधोत्+ पत्+ त्यणु+ बृहन्

योऽसौ गुणैर्विरचितो, देहोऽयं(म्) पुरुषस्य हि ।
संसारस्तन्निबन्धोऽयं(म्), पुं(म्)सो विद्याच्छिदात्मनः ॥ 10॥

गुणैर्+ विरचितो, संसा+ रस्तन्+ निबन्धोऽयं(म्),
विद्याच्+ छिदात्मनः

तस्माज्जिज्ञासयाऽऽत्मान- मात्मस्थं(ङ्) केवलं(म्) परम् ।
संगम्य निरसेदेतद्- वस्तुबुद्धिं(म्) यथाक्रमम् ॥ 11॥

तस्माज्+ जिज्ञा+ सयाऽऽत्मान, मात्+ मस्थं(ङ्), निरसे+ देतद्

आचार्योऽरणिराद्यः(स्) स्या- दन्तेवास्युत्तरारणिः ।
तत्सन्धानं(म्) प्रवचनं(वँ), विद्यासन्धिः(स्) सुखावहः ॥ 12॥

आचार्योऽ+ रणि+ राद्यः(स्), दन्ते+ वास्युत्+ तरारणिः

वैशारदी सातिविशुद्धबुद्धिर्-
धुनोति मायां(ङ्) गुणसम्प्रसूताम् ।
गुणां(म्)श्च सन्दह्य यदात्ममेतत्,
स्वयं(ञ्) च शाम्यत्यसमिद् यथाग्निः ॥ 13॥

साति+ विशुद्ध+ बुद्धिर्, गुणसम्+ प्रसूताम्,
यदात्+ ममेतत्, शाम्यत्य+ समिद्

अथैषां(ङ्) कर्मकर्तृणां(म्), भोक्तृणां(म्) सुखदुःखयोः ।
नानात्वमथ नित्यत्वं(लँ), लोककालागमात्मनाम् ॥ 14॥

कर्म+ कर्तृणां(म्), नाना+ त्वमथ,
लोक+ काला+ गमात्+ मनाम्

मन्यसे सर्वभावानां(म्), सं(म्)स्था ह्यौत्पत्तिकी यथा ।
तत्तदाकृतिभेदेन, जायते भिद्यते च धीः ॥ 15॥

ह्यौत्+ पत्तिकी, तत्+ तदा+ कृतिभेदेन

एवमप्यं(ङ्)ग सर्वेषां(न्), देहिनां(न्) देहयोगतः ।
कालावयवतः(स्) सन्ति, भावा जन्मादयोऽसकृत् ॥ 16॥

एव+ मप्यं(ङ्)ग, काला+ वयवतः(स्) , जन्मा+ दयोऽ+ सकृत्

अत्रापि कर्मणां(ङ्) कर्तु- रस्वातन्त्र्यं(ञ्) च लक्ष्यते ।
भोक्तुश्च दुःखसुखयोः(ख्), को न्वर्थो विवशं(म्) भजेत् ॥ 17॥

रस्वा+ तन्त्र्यं(ञ्)

न देहिनां(म्) सुखं(ङ्) किञ्चिद् , विद्यते विदुषामपि ।
तथा च दुःखं(म्) मूढानां(वँ), वृथाहं(ङ्)करणं(म्) परम् ॥ 18॥

विदुषा+ मपि , वृथाहं(ङ्)+ करणं(म्)

यदि प्राप्तिं(वँ) विघातं(ञ्) च, जानन्ति सुखदुःखयोः ।
तेऽप्यद्धा न विदुर्योगं(म्), मृत्युर्न प्रभवेद् यथा ॥ 19॥

को न्वर्थः(स्) सुखयत्येनं(ङ्), कामो वा मृत्युरन्तिके ।
आघातं(न्) नीयमानस्य, वध्यस्येव न तुष्टिदः ॥ 20॥

सुख+ यत्येनं(ङ्),मृत्यु+ रन्तिके, नीय+ मानस्य ,वध्यस्+ येव

श्रुतं(ञ्) च दृष्टवद् दुष्टं(म्), स्पर्धासूयात्ययव्ययैः ।
बह्वन्तरायकामत्वात्, कृषिवच्चापि निष्फलम् ॥ 21॥

स्पर्धा+ सूयात्+ यय+ व्ययैः ,बह्वन्+ तरायका+ मत्वात् ,
कृषिवच्+ चापि

अन्तरायैरविहतो, यदि धर्मः(स्) स्वनुष्ठितः ।
तेनापि निर्जितं(म्) स्थानं(यँ), यथा गच्छति तच्छृणु ॥ 22॥

अन्तरायै+ रविहतो

इष्ट्वेह देवता यज्ञैः(स्), स्वर्लोकं(यँ) याति याज्ञिकः ।
भुं(ञ्)जीत देववत्तत्र, भोगान् दिव्यान् निजार्जितान् ॥ 23॥

देव+ वत्+ तत्र ,निजार्+ जितान्

स्वपुण्योपचिते शुभ्रे , विमान उपगीयते ।
गन्धर्वैर्विहरन् मध्ये, देवीनां(म्) हृद्यवेषधृक् ॥ 24॥

स्वपुण्यो+ पचिते, गन्धर्+ वैर्+ विहरन् , हृद्यवे + षधृक्

स्त्रीभिः(ख्) कामगयानेन, किं(ङ्)किणीजालमालिना ।
क्रीडन् न वेदात्मपातं(म्), सुराक्रीडेषु निर्वृतः ॥ 25॥

का+ मगया+ नेन ,नवे+ दात्म+ पातं(म्) ,सुरा+ क्रीडेषु

तावत् प्रमोदते स्वर्गे, यावत् पुण्यं(म्) समाप्यते ।
क्षीणपुण्यः(फ्) पतत्यर्वा- गनिच्छन् कालचालितः ॥ 26॥

यद्यधर्मरतः(स्) सङ्गा- दसतां(वँ) वाजितेन्द्रियः ।
कामात्मा कृपणो लुब्धः(स्), स्त्रैणो भूतविहिं(म्)सकः ॥ 27॥

यद्य+ धर्मरतः(स्),भू+ तविहिं(म्)+ सकः

पशूनविधिनाऽऽलभ्य, प्रेतभूतगणान् यजन् ।
नरकानवशो जन्तुर्- गत्वा यात्युल्बणं(न्) तमः ॥ 28॥

पशू+ नविधिनाऽऽ+ लभ्य, यात्युल्+ बणं(न्)

कर्माणि दुःखोदर्काणि, कुर्वन् देहेन तैः(फ्) पुनः ।
देहमाभजते तत्र , किं(म्) सुखं(म्) मर्त्यधर्मिणः ॥ 29॥

दुःखो+ दर्काणि , मर्त्य+ धर्मिणः

लोकानां(लँ) लोकपालानां(म्), मद्भयं(ङ्) कल्पजीविनाम् ।
ब्रह्मणोऽपि भयं(म्) मत्तो, द्विपरार्धपरायुषः ॥ 30॥

द्विपरार्+ धपरायुषः

गुणाः(स्) सृजन्ति कर्माणि, गुणोऽनुसृजते गुणान् ।
जीवस्तु गुणसं(यँ)युक्तो, भुङ्क्ते कर्मफलान्यसौ ॥ 31॥

गुणोऽ+ नुसृजते,
कर्म+ फलान्+ यसौ

यावत् स्याद् गुणवैषम्यं(न्), तावन्नानात्वमात्मनः ।
नानात्वमात्मनो यावत् , पारतन्त्र्यं(न्) तदैव हि ॥ 32॥

तावन्+ नाना+ त्वमात्मनः , नाना+ त्वमात्+ मनो

यावदस्यास्वतन्त्रत्वं(न्), तावदीश्वरतो भयम् ।
य एतत् समुपासीरं(म्)स्- ते मुह्यन्ति शुचार्पिताः ॥ 33॥

याव+ दस्या+ स्वतन्त्र+ त्वं(न्), ताव+ दीश्वरतो

काल आत्माऽऽगमो लोकः(स्),  स्वभावो धर्म एव च ।

इति मां(म्) बहुधा प्राहुर्- गुणव्यतिकरे सति ॥ 34॥

गुण+ व्यतिकरे

**उद्धव उवाच**

गुणेषु वर्तमानोऽपि, देहजेष्वनपावृतः ।

गुणैर्न बद्ध्यते देही, बद्ध्यते वा कथं(वँ) विभो ॥ 35॥

देहजेष्+ वनपावृतः

कथं(वँ) वर्तेत विहरेत्, कैर्वा ज्ञायेत लक्षणैः ।

किं(म्) भुं(ञ्)जीतोत विसृजेच्-छयीतासीत याति वा ॥ 36॥

छयी+ तासीत

एतदच्युत मे ब्रूहि,  प्रश्नं(म्) प्रश्नविदां(वँ) वर ।

नित्यमुक्तो नित्यबद्ध, एक एवेति मे भ्रमः ॥ 37॥

एत+ दच्युत

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)

सं(म्)हितायामेकादशस्कन्धे भगवदुद्धवसं(वँ) वादे दशमोऽध्यायः ॥ 10॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

